न स्वमस्ति । नन्वाहवनीयादीनामपि पाकादिसाधनत्वमस्त्येव । नैतत् । न हि तत्राहवनीयादिरूपेण पाकादिसाधनत्वं किं तर्हि प्रत्यक्षादिपरिदृश्यमानाग्न्यादिरूपेण । इह तु सुवर्णादिरूपेण न क्रयादिसाधनत्वमपि तु स्वत्वेनैव । न हि यस्य यत्स्वं न भवति तत्तस्य क्रयाद्यर्थक्रियां साधयति । अपि च प्रत्यन्तवासिनामप्यदृष्टशास्त्रव्यवहाराणां स्वत्वव्यवहारो दृश्यते क्रयविक्रयादिदर्शनात् । किञ्च । नियतोपायकं स्वत्वं लोकसिद्धमेवेति न्यायविदो मन्यन्ते । तथा हि लिप्सासूत्रे तृतीयवर्णके द्रव्यार्जननियमानां क्रत्वर्थत्वे स्वत्वमेव न स्यात् स्वत्वस्यालौकिकत्वादिति पूर्वपक्षासम्भवमाशङ्क्य द्रव्यार्जनस्य प्रतिग्रहादिना स्वत्वसाधनत्वं लोकसिद्धमिति पूर्वपक्षः समर्थितो गुरुणा । ननु द्रव्यार्जनस्य क्रत्वर्थत्वे स्वमेव न भवतीति याग एव न संभवतीति । प्रलपितमिदं केनापि अर्जनं स्वत्वं नापादयतीति विप्रतिसिद्धमिति वदता । तथा सिद्धान्तेऽपि स्वत्वस्य लौकिकत्वमङ्गीकृत्यैव विचारप्रयोजनमुक्तम् । अतो नियमातिक्रमः पुरुषस्य न क्रतोरिति । अस्य चार्थ एवं विवृतः । यदा द्रव्यार्जननियमानां क्रत्वर्थत्वं तदा नियमार्जितेनैव द्रव्येण क्रतुसिद्धिः । नियमातिक्रमार्जितेन द्रव्येण न क्रतुसिद्धिरिति न पुरुषस्य नियमातिक्रमदोषः पूर्वपक्षे । सिद्धान्ते तु अर्जननियमस्य पुरुषार्थत्वात्तदतिक्रमेणार्जितेनापि द्रव्येण क्रतुसिद्धिर्भवति । पुरुषस्यैव नियमातिक्रमाद्दोष इति नियमातिक्रमार्जितस्यापि स्वत्वमङ्गीकृतम् अन्यथा क्रतुसिद्ध्यभावात् न चैतावता चौर्य्यादिप्राप्तस्यापि स्वत्वं स्यादिति मन्तव्यम् लोके तत्र स्वत्वप्रसिद्ध्यभावाद् व्यवहारविसंवादाच्च । एवं प्रतिग्रहाद्युपायके स्वत्वे लौकिके स्थिते ब्राह्मणस्य प्रतिग्रहादय उपायाः । क्षत्रियस्य विजितादय उपायाः वैश्यस्य कृष्यादयः शूद्रस्य शुश्रूषादय इत्यदृष्टार्था नियमाः । रिक्थक्रयादयस्तु सर्वसाधारणाः "स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेष्वित्युक्ताः । तत्राप्रतिबन्धो दायो रिक्थम् । क्रयः प्रसिद्धः संविभागः सप्रतिबन्धो दायः । परिग्रहोऽनन्यपूर्वस्य जलतृणकाष्ठादेः स्वीकारः । अधिगमो निध्यादेः प्राप्तिः । एतेषु निमित्तेषु सत्सु स्वामी भवति । ज्ञातेषु ज्ञायते स्वामी । ब्राह्मणस्याधिकं लब्धमिति ब्राह्मणस्य प्रतिग्रहादिना यल्लब्धं तदधिकमसाधारणम् । क्षत्रियस्य विजितमित्यत्राधिकमित्यनुवर्तते क्षत्रियस्य विजयदण्डादिलब्धमसाधारणम् । निर्विष्टं वैश्यशूद्रयोरिति । अत्राप्यधिकमित्यनुवर्त्तते वैश्यस्य कृषिगोरक्षादिलब्धं निर्विष्टं तदसाधारणं शूद्रस्य द्विजशुश्रूषादिना भृतिरूपेण यल्लब्धं तदसाधारणमेवमनुलोमजानां प्रतिलोमजानाञ्च लोकप्रसिद्धेषु स्वत्वहेतुषु यद्यदसाधारणमुक्तम् "सूतानामश्वसारथ्यम्" इत्यादि तत्तत् सर्वं निर्विष्टशब्देनोच्यते सर्वस्यापि भृतिरूपत्वात् "निर्वेशो भृतिभोगयोरिति" त्रिकाण्डीस्मरणात् । तत्तदसाधारणं वेदितव्यम् । यदपि पत्नीदुहितरश्चेत्यादिस्मरणम् । तत्रापि स्वामिसम्बन्धितया बहुषु दायविभागितया प्राप्तेषु लोकप्रसिद्धेऽपि स्वत्वे व्यामोहनिवृत्त्यर्थं स्मरणमिति सर्वमनवद्यम्" ।

तच्च स्वत्वं जन्मनैवेति मिताक्षरादयः । पित्रादिमरणादिनैवेति दायभागादयः । तत्रापि समुदायद्रव्ये स्वत्वमिति मिताक्षरादयः । प्रदेशभेदे इति दायभागादयः । तत्तद्ग्रन्थे विस्तरो दृश्यः । [सुष्ठु अदनम् । २शुभक्षणे हेमच०।

**स्वदन** न० स्वद–भावे ल्युट् । १आस्वादे २लेहने च राजनि०।

**स्वधर्म्म** पु० स्वस्य वेदादिविहितो धर्मः । स्वानुरूपे वेदाद्युक्ते आचारादिधर्मे । "यो यस्य विहितो धर्मः स तज्जातिः प्रकीर्त्तितः । तस्मात् स्वधर्मं कुर्य्याच्च द्विजो नित्यमनापदि" नरसिंहपु० । "श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात् । स्वधर्मे निधनं श्रेयः परधर्मो भयावहः" गीता ।

**स्वधा** अव्य० स्वद–आ पृषो० दस्य धः । १पितृदेवोद्देशेन हविस्त्यागे अमरः । स्वेन धयति धे–क आप् । २मातृकाभेदे स्त्री "नमः स्वधायै स्वाहायै" इति पितृगाथा । "निपातस्वधायोगे त्यागोद्देश्यपदात् चतुर्थी पितृभ्यः स्वधेत्यादौ पितृउद्देश्यकत्याग इति बोधः । तदर्थस्य विषयतया अत्र दानान्वयो तस्य निपातत्वेन तदर्थस्य भेदान्वयस्य व्युत्पत्तिसिद्धत्वात् । इदमन्नं पित्रे स्वधेत्यादौ पितृउद्देश्यकत्यागविषय इदमन्नमित्यादि बोधः । मातृभेदस्वधा च दक्षकन्या ब्रह्मणो मानसी कन्या च पितृपत्नी । तन्नामोच्चारणे पित्रादिश्राद्धकरणरूपोऽस्यावरो ब्रह्मणा दत्तः ।"ब्रह्मा च मानसीं कन्यां ससृजे तां मनोहराम्" "स्वधाभिधानां सुदतीं लक्ष्मीलक्षणसंयुताम्" "पितृभ्यस्तां ददौ ब्रह्मा तुष्टेभ्यस्तुष्टिरूपिणीम् । ब्राह्मणानामुपदेशं चकार लोकनायकः । स्वधान्तं मन्त्रमुच्चार्य्य पितृभ्यो देहि चेति च । क्रमेण तेन विप्राश्च पित्रे दानं ददुः पुरा" ब्रह्मवै०प्र०